सह पार्षदैः। सहोमया च भवति दर्शनं कामरूपिणः। अस्मिन् सरसि सत्रैर्व्वै चैत्रे मासि पिनाकिनम्। यजन्ते याजकाः सम्यक् परिवारशुभार्थिनः। अत्रोपस्पृश्य सरसि श्रद्दधानो जितेन्द्रियः। क्षीणपापः शुभान् लोकान् प्राप्नुते नात्र संशयः"।

"काश्मीरमण्डले नद्यो याः पतन्ति महानदम्। ताः नदीः सिन्धुमासाद्य शीलवान् स्वर्गमाप्नुयात्" भा॰ आनु॰२५अ॰। काश्मीरदेशउत्पत्तिस्थानत्वेनास्त्यस्याः अच् टाप्। ८कपिलद्राक्षायां स्त्री राजनि॰। ९ अतिविकायां स्त्री मेदि॰।

**काश्मीरक** त्रि॰ काश्मीरे भवः मनुष्यस्तत्स्थोवा वुञ्। काश्मीरदेशोद्भवे १मनुष्ये २तत्स्थे च। "ततः काश्मीरकान् वीरान् क्षत्रियान् क्षत्रियर्षभः" भा॰स॰ २६अ॰।

**काश्मीरज** न॰ काश्मीरे जायते जन—ड ७त॰। १कुष्ठे (कुड़)२कुङ्कुमभेदे च मेदि॰। ३पुष्करमूले विश्वः।

**काश्मीरजन्मन्** न॰ काश्मीरे जन्म यस्य। कुङ्कुमभेदे अमरः।

**काश्मीर्य्य** त्रि॰ काश्मीरेण निर्वृत्तादि सङ्काशा॰चतुरर्थ्यां ण्य। १काश्मीरनिर्वृत्तादौ २कुङ्कुमभेदे न॰

**काश्य** न॰ कं जलमाश्यं यत्र कुत्सितं वा आश्यं अश—ण्यत् कश्य+स्वार्थेऽण् वा। १मद्ये हेमच॰। काश्यां भवः यत्। २काशिराजे पु॰। स्वार्थेक। तत्रैव। "शलात्मजस्यार्ष्टिषेण स्तनयस्तस्य काश्यकः। काश्यस्य काश्यपः पुत्रो राजा दीर्घतपास्तथा" हरिवं॰ २९अ॰।

**काश्यप** न॰ काश्यं मद्यं पिबत्यत्र पा—घञर्थे क। १मांसे हेमच॰। मांसस्य मद्यपानाव्यभिचारात्तथात्वम्। काश्यं राजभेदं पाति नरकात् पा—क। काश्यस्य नृपस्य २पुत्रभेदे काश्यशब्दे उदा॰। कश्यपस्य गोत्रापत्यम् विदा॰ अञ्। ३कश्यपगोत्रापत्ये पुंस्त्री। ४कणादे मुनौ पु॰ त्रिका॰। ५मृगभेदे पुंस्त्री मेदि॰ स्त्रियां जातित्वात् ङीष्। कश्यपस्येदम् अण्। ६कश्यपसम्बन्धिनि त्रि॰ "एष एव दितेर्गर्भ ओजः काश्यपमर्पितम्" भाग॰३,१५, ११श्लो॰। स्त्रियां ङीप्। सा च ७पृथिव्याम् स्त्री तस्याः तत्सम्बन्धितया तत्सुतत्वकथा भा॰ आनु॰१५४अ॰उक्ता यथा "इमां भूमिं द्विजातिभ्यो दित्सुर्वै दक्षिणां पुरा। अङ्गो नाम नृपो राजंस्ततश्चिन्तां मही ययौ। धारिणीं सर्वभूतानामयं प्राप्य वरो नृपः। कथमिच्छति मां दातुं द्विजेभ्यो ब्रह्मणः सुताम्। साऽहं त्यक्त्वा गमिष्यामि भूमित्वं ब्रह्मणः पदम्। अयं सराष्ट्रो नृपतिर्मा भूदिति ततोऽगमत्। ततस्तां कश्यपो दृष्ट्वा व्रजन्तीं पृथिवीं तथा। प्रविवेश महीं सद्यो मुक्त्वात्मानं समाहितः। ऋद्धा सा सर्वतो जज्ञे तृणौषधिसमन्विता। धर्मोत्तरा नष्टभया भूमिरासीत्ततो नृप!। एवं वर्षसहस्राणि दिव्यानि सततं नृप!। त्रिंशतः काश्यपो राजन्! भूमिरासीदतन्द्रिता। अथागम्य महाराज! नमस्कृत्य च कश्यपम्। पृथिवी काश्यपी जज्ञे सुता तस्य महात्मनः"। ८तद्गोत्रापत्यस्त्रियां स्त्री ङीष् "काश्यपीबालाक्यमाठरीपुत्रात् काश्यपीबालाक्यमाठरीपुत्रः" शत॰ब्रा॰१४,९,४,३१॰ ९कश्यपपत्न्यां स्त्री काश्यपेयः। कश्यपगोत्रोत्पन्ने विषचिकित्साभिज्ञे १०ऋषिभेदे पु॰ तत्कथा भा॰आ॰ ४२अ॰ यथा

"काश्यपोऽभ्यागमद्विद्वांस्तं राजानं चिकित्सितुम्। श्रुतं हि तेन तदभूद्यथा तं राजसत्तमम्। तक्षकः पन्नगश्रेष्ठो नेष्यते यमसादनम्। तं दष्टं पन्नगेन्द्रेण करिष्येऽहमपज्वरम्। तत्र मेऽर्थश्च धर्म्मश्च भवितेति विचिन्तयन्। तं ददर्श च नागेन्द्रस्तक्षकः काश्यपं पथि। गच्छन्तमेकमनसं द्विजो भूत्वा वयोऽतिगः। तमब्रवीत् पन्नगेन्द्रः काश्यपं मुनिपुङ्गवम्। क्व भवांस्त्वरितो याति किञ्च कार्य्यं चिकीर्षति। काश्यप उवाच। नृपं कुरुकुलोत्पन्नं परीक्षितमरिन्दमम्। तक्षकः पन्नगश्रेष्ठस्तेजसाद्य प्रधक्ष्यति। तं दष्टं पन्नगेन्द्रेण तेनाग्निसमतेजसा। पाण्डवानां कुलकरं राजानममितौजसम्। गच्छामि त्वरितं सौम्य! सद्यः कर्त्तुमपज्वरम्। तक्षक उवाच। अहं स तक्षको ब्रह्मंस्तं धक्ष्यामि महीपतिम्। निवर्त्तस्व न शक्तस्त्वं मया दष्टं चिकित्सितुम्। काश्यप उवाच। अहं तं नृपतिं गत्वा त्वया दष्टमपज्वरम्। करिष्यामीति मे बुद्धिर्विद्याबलसमन्वितः।

तक्षक उवाच। यदि दष्टं मयेह त्वं शक्तः किञ्चिच्चिकित्सितुम्। ततो वृक्षं मया दष्टमिमं जीवय काश्यप!। परं मन्त्रबलं यत्ते तद्दर्शय यतस्व च। न्यग्रोधमेनं धक्ष्यामि पश्यतस्ते द्विजोत्तम!। काश्यप उवाच। दश नागेन्द्र! वृक्षं त्वं यद्येतदभिमन्यसे। अहमेनं त्वया दष्टं जीवयिष्ये भुजङ्गम!। सौतिरुवाच। एवमुक्तः स नागेन्द्रः काश्यपेन महात्मना। अदशद्वृक्षमभ्येत्य न्यग्रोधं पन्नगोत्तमः। स वृक्षस्तेन दष्टस्तु पन्नगेन महात्मना। आशीविषविषोपेतः प्रजज्वाल समन्ततः। तं दग्ध्वा स नगं नागः काश्यपं पुनरब्रवीत्। कुरु यत्नं द्विजश्रेष्ठ!